No. १२५४४ क

Title प्रत्यङ्गिरा पटलम्

Author

Extent २० पत्र Age

Subject तन्त्र

प्रत्यंगिरा पटल

~~बटुकभैरवसहस्र~~

~~नाम~~

नं० १२४६

5704

१

सं० १५८

Complete



प्र॰
प॰
१

ॐश्रीगुरुपादुकाभ्योनमः ॐश्रीगणेशायनमः
ॐश्रीप्रत्यंगिराभगवत्यैनमः ॐमेरुपृष्ठेसुखासी
नंभैरवंपरमेश्वरं प्रसन्नवदनंदेवं नागयज्ञोपवी
तिनं १ गजचर्मपरीधानंभूतिभूषणविग्रहं कपा
लमालाभरणंगंगावीचिरवाकुलम् २ चंद्रार्धांचि
तमूर्धानं सर्पकंकणनूपुरं खट्वांगशूलपाशासि
विभूषितकरांबुजं ३ वामांकस्थितगौरीकंदेवगंधर्व

सेवितं यक्षेन्द्रकिन्नरगन्धर्वब्रह्माच्युतनमस्कृतं ४ प्र
हसंतं जपंतं च ध्यायंतं च महेशं मुदा स्मितपूर्वं प्रणम्या
दौ बद्धाञ्जलिपुटा ततः ५ उत्थाय पार्वती देवी भग
वंतमभाषत श्रीदेव्युवाच भगवंस्त्वं परो देवस्त्रैलो
क्यप्रभुरीश्वरः ६ त्रिगुणात्मा गुणातीत त्रिस्वरूपो
निरंजनः सकलो निष्कलो देवः सत्तारूपो महेश्वरः
७ त्वं किं जपसि देवेश ममा यविदितं त्वयत् तन्मया

प्र· चत्वं सकलं पर्यन्तं नववल्लभा ८ श्रीभैरव उवाच
प· एतद्गुह्यतमं लोके न कस्य कथितं मया तथापि तव
२ देवेशि भक्त्या गुह्यं वदाम्यहं ९ या देवी लोकमातेति
2 महामाहेश्वरी शिवा· प्रत्यंगिरेति विख्याता साष्टविंश
तिवर्णिका १० सृजते सकलं विश्वं बिभ्रती वर्ततेंबिकां
ते संहारकर्त्री च संहरिष्यति तामसी ११ गुणत्रयमयी विद्या
महादारिद्र्यहारिणी तस्याः पंचांगमीशानि पठाम्यहमहर्निशं १२

जपविद्यार्चनेनस्यावर्मनामसहस्रकं स्तवोमंत्रम
योदेविपंचांगमिदमुत्तमम् ११ प्रभावादस्यधीशा
नः सृष्टिस्थितिलयात्मकः श्रीदेव्युवाच भगवन्दे
वदेवेशानिःशेषकरुणाकर देव्याःप्रत्यंगिरायाः
स्वपंचांगवक्तुमर्हसि श्रीभैरवउवाच पटलपद्ध
तिंचैव वर्मनामसहस्रकं स्तोत्रंमंत्रमयंदेविव
क्ष्येलोकहितेच्छया अत्रादौपटलेदिव्यंमूलमंत्रम

प्र० पं०
३

3

यंपरं सयंत्रमंत्रसहितं प्रयोगसहितंशृणु अथमंत्रो
द्धारः प्रणवंवाग्भवंमायालक्ष्मीःप्रत्यंगिरेतिच मम
रक्षद्वयंदेवि ममशत्रून्नतःपरम् मत्तद्वंद्वंसतारंच
स्वाहांतोमंत्ररुत्तमः एषाविद्यामयाख्याता परमार्थ
प्रदायिनी भोगदासुखदादेवी राज्यदाधनदातथा सि
द्धिदामोक्षदाविद्यापरंसायुज्यदायिनी गुरुपादप्रसा
देन श्रीविद्यायदिलभ्यते विनागुरूपदेशेन सानसि

ह्यास्मिभारते नास्यांतरायोनक्लेशोनशौचनियमोपि
वासालात्सिद्धिप्रदोदेविमंत्रोयंभोगमोक्षदः वर्णल
क्षंपुरश्चर्यातदर्धवामहेश्वरि एकलक्षावधिंकुर्या
ज्ञातोन्यूनंकदाचन जपाद्दशांशतोहोमस्तद्दशांशे
नतर्पणं मार्जनंतद्दशांशेनतद्दशांशेनभोजनम्
वटेरण्येश्मशानेच शून्यागारेचतुष्पथेश्वर्थगात्रेच
मध्याह्ने पुरश्चरणमारभेत्जीवहीनोयथादेहः स

श्र- प- ४

वेकर्मसत्तनत्तमः पुरश्चरणहीनोयो नमंत्रःफल
दायकः मंत्रमुत्कीलयेदादौ मंत्रंसंजीवयेत्ततः तौ
टिल्यंतुचरेत्पश्चा ततःशापहरींजपेत् सिद्धिमंत्रं
जपेत्पुरंद ततःसंपुटिंतचरेत् क्रमेनानेनदेवेशि
श्रीविद्यायोजपेन्नरःवि ससाधकोभवेल्लोके भोगीसा
युज्यमाप्नुयात् मंत्रस्यास्यमुनिःश्रीकौ महाभैरवएववश्च
तुष्टुप्छंदहृस्तुकः श्रीमत्सुंदरीरितिच देवतास्यपराबीजं

शक्तिः स्वाहा च कीलकं भोगापवर्गसिद्ध्यर्थं विनियो
गः इति स्मृतः ध्यानमस्याः प्रवक्ष्यामि सर्वतन्त्रेषु गो
पितं आशांबरा मुक्तकचा घनच्छवि र्ध्येया सचर्मासि
करा हि भूषणा दंष्ट्रोग्रवक्त्रा ग्रसिता हिता त्वया प्र
त्यंगिरा शंकरतेजसेरिता यंत्रोद्धारं प्रवक्ष्यामि सर्व
सिद्धिप्रवर्तकं सर्वसंमोहनं चक्रं सर्वाशापरिपूरकं
विंदु त्रिकोणवसुकोणकनागयुक्तं ॥

हृत्साधूपपत्रकयुटं चत्रिहृन्मयुक्तम् भूगेहलक्ष्मवेचितं
सकलंसुसिद्धं प्रत्यंगिराभगवतीवसनेसदास्मिन् ल
यागमस्यवक्ष्यामि यंत्रराजस्यपार्वति येनश्रवण
मात्रेण कोटिपूजाफलंलभेत् इंद्राद्यालोकपाला
श्च ब्रह्मानंतांकिताःप्रिये वज्रादि हेतिसंयुक्ताः पूज्या
भूगेहमंडले वायव्येशानपर्यंतं दिव्यसिद्धौघमान
वान् गुरून्संपूजयेद्देवि पंक्तित्रितयमध्यगान् ब्रह्मा

प्र॰ घामांतरः पूज्या भैरवाष्टकसंयुताः वामावर्तक्रमे
पं ट॰ णैव रक्तपुष्पैर्विशेषतः स्तंभिनीमोहिनीचैव क्षोभि
८ णीद्राविणीतथा जंभिणी भ्रामणीरौद्री तथासंहारि
६ णीतिच वसुकोणेपरापूज्या महाचीनक्रमेक्रमैः वा
मावर्तेनदेवेशि परमार्थप्रदासदा कालीचभद्रका
लीच नित्याकालीत्रिकोणगाः एताःसंपूजनीयास्तु शि
वायावामभागतः बिंदौमाहेश्वरींदेवीं देवीप्रत्यंगिरांबिका

शिवंचभैरवंनाम पूजयेद्धिंडुमंडले देवीरत्नमयी
पात्रे सौवर्णैपूजयेत्सुधीः लयांगमेतदाख्यातं स
र्वसिद्धिप्रदंशिवे प्रयोगानथवक्ष्येहं शृणुष्वावहि
ताप्रिये स्तंभनंमोहनंचैव मारणाकर्षणेनतः व
शीकारोच्चाटनाख्ये शांतिकंपौष्टिकंततः पतेषांसा
धनंवक्ष्ये मंत्रसिद्धिप्रवर्तकं येनश्रवणमात्रेण मंत्रः
कल्पद्रुमोभवेत् रवौस्नात्वाजपेन्मूलं वटमूलेमहे

प्र-
प-टं-
7

म्परि अयुतंतद्दशांशेन हुनेदाज्यसितांशटीम् गोधूम
मधुनालाजा स्तंभयेद्वादिनांगतीः जलसूर्येंद्रवाता
नां गतिरेषांचकुच्यते अम्बत्थस्यतलेजप्त्वा मूलवि
द्यांयथाविधिः अयुतंतद्दशांशेन जुहुयात्सर्पिरेरण्डजं
मांसंकणाशटीमिश्रं मोहनंजगतांभवेत् कुजेवाश
निवारेपि अर्केविधेंदुसंगमे गत्वाश्मशानेदेवेशि न
ग्नादिग्भूतभैरवान् चिंतांसंपूज्यवीरेशो जपेदयुतसं

ख्येया चितान्नोज्ज्ञयादाज्यं गुडत्रुप्पशनावरीः चंडा
लकेशनाखर दंतमिश्राश्वसाधकः तर्पयेत्तदशांशे
न भोजयेत्पात्रपूर्वकं शत्रुर्विद्रुसमानोपि स्वद्रुमाया
ति नान्यथा करीरमूलेगिरिजे जपेन्मूलंशिवेयुतं
ज्ञनेदाज्यंवचांमुंडी मोहयत्यबलादलं मेनकापी
नवल्लोजा स्वस्थाप्याकर्षिताभवेत् वानीरमूलेदेवे
शि जपेदयुतसंख्यया ज्ञनेदाज्यंमूफयुतं नागव

स्व·
प·ट·
८

ह्रीदलांकितं भूर्निबंतर्पयेद्देवि दशांशेनैवसाधकः
शक्रोपिदासतांयाति किंपुनःक्षुद्रमानुषः क्रूरर्क्षे
क्रूरवेलायां जपेत्प्रेतालयेमनुं अयुतंतत्त्विताव
स्रौ जुहेनेत्सर्पिकणोषणान् जातीफलमेषपलं त्व
रोमाणिपार्वति त्रिपूर्णासहस्रादेवि भवेदुच्चाटने
परं नदीकूलेजपेन्मंत्रं अयुतंसाधकोत्तमः तद्दशां
शंजुहेनेदाज्यं समृद्धीकं सपायसं कनकंनागरंराज्ञो

4

तर्पये त्तद्दशांशतः अतिवृष्टेरनावृष्टे र्मारीभीतेर्म
हेश्वरि राजभीतेर्महाव्याघ्रा त्सर्पः शांतिः प्रजायते
महापर्वदिनेदेवि यत्रतत्रजपेन्मंत्रं अयुतंतद्दशां
शेन जुहुयादाज्यपायसं शैलसिंधुरमिश्रंच सप
लेसलवंगकं पनमांससारमीने साम्लंचसक्तु
लत्यकं सा सर्वशुक्रसहितं रजांवत्सवशान्वितं फ
लाचतर्पयित्वाच भोजयित्वाचसाधकान् पितरणां

प. ८. ९

९

देवतानांच ऋषीनांञ्जलिनांप्रिये दिव्यकल्पाश्रुतंदे
वि महापुष्टिः प्रजायते सर्वध्यासर्वदानित्यं महावि
द्यांजपेत्सुधीः दशांशंहोमयेत्तत्र तर्पयेत्तद्दशांशतः
भोजयेत्तद्दशांशेन मंत्रीकिंकिंनसाधयेत् मूर्खो
वागीशतांयाति निर्धनोधनवान्भवेत् महादारि
द्रयुक्तोपिभवेद्वैश्रवणोपमः इहलोकेभवेद्भोगी
परत्रत्रिदिवंव्रजेत् इतीदंमंत्रसर्वस्वं प्रसंगीगारह

ख्यकं पटलं गुह्यमीशानि गोपनीयं स्वयोनिवत्
इति श्रीप्रत्यंगिरारहस्ये रुद्रयामले तंत्रे पंचांगखं
डे प्रत्यंगिरापटलं समाप्तम् ॥